# Brahmaproktam Shivarchanopadesham 2

# બ્રહ્માપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

## Document Information

Text title : Brahmaproktam Shivarchanopadesham 2

File name : shivArchanopadesham2brahmAproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 15 | 93-119||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# બ્રહ્માપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

ન ભયં શિવભક્તાનામભયપ્રદમીશ્વરમ્ ।
યતોઽર્ચયન્તિ સતતમપ્રમત્તાઃ શિવાર્ચકા ॥ ૯૩॥

ઉદેતુ ભાનુરપ્યેષ પશ્ચિમાયાં દિશીશ્વરિ ।
તથાપિ શિવભક્તાનાં ભયલેશોઽપિ નો ભવેત્ ॥ ૯૪॥

ભવન્તુ સાગરાઃ સર્વ ઉદ્વેલાઃ ક્ષોભહેતવઃ ।
તથાપિ શિવભક્તાનાં ભયલેશોઽપિ નો ભવેત્ ॥ ૯૫॥

કમ્પમેત્વનિશં ભૂમિઃ સશૈલવનકાનના ।
તથાપિ શિવભક્તાનાં ભયલેશોઽપિ નો ભવેત્ ॥ ૯૬॥

અમાયામુદયં યાતુ ચન્દ્રઃ સર્વકલાયુતઃ ।
તથાપિ શિવભક્તાનાં ભયલેશોઽપિ નો ભવેત્ ॥ ૯૭॥

પ્રકાશન્તાં તુ નક્ષત્રા અપિ નિત્યમહર્નિશમ્ ।
તથાપિ શિવભક્તાનાં ભયલેશોઽપિ નો ભવેત્ ॥ ૯૮॥

ધૂસરાઃ સન્તુ સર્વાસ્તા દિશઃ પ્રતિદિશસ્તથા ।
તથાપિ શિવભક્તાનાં ભયલેશોઽપિ નો ભવેત્ ॥ ૯૯॥

પતન્ત્વશનિસઙ્ઘાશ્ચ બહવઃ સતતં ભુવિ ।
તથાપિ શિવભક્તાનાં ભયલેશોઽપિ નો ભવેત્ ॥ ૧૦૦॥

દેવાઃ કિં બહુનોક્તેન સર્વથા શાઙ્કરૈર્જનઃ ।
પદે પદેઽપિ કલ્યાણં પ્રાપ્તવ્યં નાત્ર સંશયઃ ॥ ૧૦૧॥

શઙ્કરાસક્તચિત્તાનાં શઙ્કરઃ કરુણાકરઃ ।
દદાતિ મઙ્ગલં નિત્યં મઙ્ગલાપતિરીશ્વરઃ ॥ ૧૦૨॥

ધ્યાતો દદાતિ ગૌરીશઃ મઙ્ગલં મઙ્ગલાશ્રયઃ ।
મઙ્ગલાપતિસંસક્તચિત્તાનાં નાસ્ત્યમઙ્ગલમ્ ॥ ૧૦૩॥

અત એવ મુનિશ્રેષ્ઠાઃ શિવતત્ત્વવિશારદાઃ ।
અનેકજન્મભિર્યેન તપ્તં ઘોરતરં તપઃ ॥ ૧૦૪॥

તેનૈવ શઙ્કરે ભક્તિઃ ક્રિયતેઽનન્યચેતસા ।
અનન્યભાઙ્મહાદેવં યોઽર્ચયિષ્યતિ સર્વદા ॥ ૧૦૫॥

સ એવ ધન્યઃ પુણ્યાત્મા તસ્યાપ્રાપ્યં ન કિઞ્ચન ।
જયેતિ શઙ્કરાદન્યં કેચિન્માયાવિમોહિતાઃ ॥ ૧૦૬॥

વદન્તિ તેષાં ભદ્રાણિ નૈવ કલ્પશતૈરપિ ।
અપ્રમેયમનાદ્યન્તં નિત્યં શઙ્કરમીશ્વરમ્ ॥ ૧૦૭॥

અનારાધ્ય જડાઃ કેચિદર્ચયન્ત્યન્યદૈવતમ્ ।
ઈશ્વરત્વેન સમ્ભાવ્યાનીશ્વરં યે ભજન્તિ તે ॥ ૧૦૮॥

સ્વેષ્ટં ન પ્રાપ્નુવન્ત્યેવ લભન્તેઽનિષ્ટમપ્યહો ।
શિવ એવ શિવપ્રાપ્ત્યૈ ધ્યેયો નિત્યં મનીષિભિઃ ॥ ૧૦૯॥

ઈશ્વરઃ સર્વભૂતાનાં શિવો હિ શ્રુતિભિઃ શ્રુતઃ ।
અતઃ સર્વાત્મના નિત્યં ભજનીયો મહેશ્વરઃ ॥ ૧૧૦॥

યઃ શઙ્કરં વિહાયાન્યં સુરમર્ચયિતું યતેત્ ।
સમ્મુખસ્થાં સુધાં ત્યક્ત્વાક્ષારામ્ભઃ પાતુમિચ્છતિ ॥ ૧૧૧॥

યસ્યાસ્ત્યનન્યગા ભક્તિર્મહાદેવે મહેશ્વરે ।
સ એવ કૃતકૃત્યશ્ચ સ એવ સુભગોત્તમઃ ॥ ૧૧૨॥

યસ્યાસ્ત્યનન્યગા ભક્તિર્મહાદેવે સુરોત્તમે ।
તસ્ય તજ્જન્મવિગમે મુક્તિરેવ ન સંશયઃ ॥ ૧૧૩॥

શિવે પરમકલ્યાણનિદાને પરમેશ્વરે ।
ધન્યા એવ હિ કુર્વન્તિ ભક્તિં મુક્તિપ્રદાયિનીમ્ ॥ ૧૧૪॥

યં યં સદાશિવો નિત્યમનુગૃહ્ણાતિ વૈ સુરાઃ ।
તસ્યૈવ શઙ્કરે શ્રદ્ધા ભક્તિશ્ચાપિ ભવેદ્ધ્રુવમ્ ॥ ૧૧૫॥

યઃ શઙ્કરં સમાલોક્ય નાભિનન્દતિ સત્વરમ્ ।
સ દગ્ધચિત્તો મોહેન જ્ઞેયઃ પાપકુલાશ્રયઃ ॥ ૧૧૬॥

પૂજિતઃ પ્રણતઃ સ્પૃષ્ટશ્ચિન્તિતઃ સંસ્તુતઃ શિવઃ ।
દદાતિ સૌખ્યમતુલં મુક્તિમપ્યનરોત્તમઃ ॥ ૧૧૭॥

સ ભાગ્યવાન્સ પુણ્યાત્મા સ ધન્યો ધન્યપૂજિતઃ ।
તસ્યૈવ પિતરૌ ધન્યૌ તસ્યૈવ કુલમુત્તમમ્ ॥ ૧૧૮॥

યેન સામ્બો મહાદેવઃ પૂજ્યતે સર્વદા મુદા ।
સર્વોત્તમં મહાદેવં વિદિત્વા યોઽર્ચયિષ્યતિ ॥ ૧૧૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બ્રહ્માપ્રોક્તં શિવાર્ચનોપદેશં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૫ । ૯૩-૧૧૯॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 15 . 93-119 ..

Notes:

Upon being approached by distressed Deva-s દેવાઃ, Brahmā બ્રહ્મા gives Upadeśa ઉપદેશ to them worshipping Śiva શિવ.

Encoded and proofread by Ruma Dewan

---

*Brahmaproktam Shivarchanopadesham 2*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*